दिनांक 17-12-20

उपशास्त्री प्रथम वर्ष, विषय-व्याकरण
सिद्धान्तकौमुदी, अजन्तस्त्रीलिङ्ग प्रकरणम्

1 सर्वस्यै - सर्वा शब्दात् अर्थवदिति प्रातिपदिक संज्ञायां, स्वौजस इति सूत्रेण द्व्येकयोर्द्विवचनैकवचने इति सूत्र सहकारेण सर्वा शब्दात् ङे विभक्तौ अनुबन्ध लोपे, याडापः इति सूत्रेण याडागमे प्राप्ते तं प्रबाध्य सर्वनाम्नः स्याड्ढ्रस्वश्च इति सूत्रेण स्याडागमे आपश्च ह्रस्वे सर्व स्या ए इति जाते वृद्धिरेचि इति वृद्धौ सर्वस्यै इति सिद्धम्।

2 सर्वासाम् - सर्व शब्दात् अर्थवदिति प्रातिपदिक संज्ञायाम्, स्वौजस इति सूत्रेण तथा बहुषु बहुवचनम् इति सूत्र सहकारेण सर्वाशब्दात् आम् विभक्तौ आमि सर्वनाम्नः सुट् इति सूत्रेण सुडागमे अनुबन्ध लोपे। सर्वासाम् इति सिद्धम्।

3 मत्यै - मति शब्दात् चतुर्थी एकवचने ङे विभक्तौ ङिति ह्रस्वश्च इति सूत्रेण वा नदीसंज्ञायाम् आण्नद्याः इति आडागमे आटश्च इति वृद्धौ इको यणचि इति यणे मत्यै इति सिद्धम्

4 मतये - मति-ए इति दशायां शेषो घ्यसखि इति सूत्रेण घिसंज्ञायाम्, घित्वात् घेर्ङिति इति सूत्रेण गुणे, एचोऽयवायावः इति सूत्रेण अयादेशे सति मतये इति सिद्धम्।

5 मत्याः मति शब्दात् पञ्चमी एकवचने तथा षष्ठी एकवचने ङसि, ङस विभक्तौ अनुबन्ध लोपे मति अस् इति दशायां ङिति ह्रस्वश्च इति सूत्रेण वा नदीसंज्ञायाम् आण्नद्याः इति सूत्रेण आडागमे, आटश्च इति सूत्रेण वृद्धौ इको यणचि इति सूत्रेण यणादेशे सकारस्य रुत्वे विसर्गे मत्याः इति सिद्धम्।

अमरनाथ मिश्र
स०प्रो०व्याकरण
रा०उ०सं०म०वि० जुब्बलेना
पूर्णिमा

दिनांक 17-12-20 उपशास्त्री द्वितीय वर्ष, विषय व्याकरण
ग्रन्थ- सिद्धान्त कौमुदी, अदादि प्रकरणम्

1 ईयतुः - इण् धातोर्लिटि, लिटःस्थाने तिप्तस्झि इति सूत्रेण तस् प्रत्यये। परस्मैपदानां णलतुस्- इति सूत्रेण तस् स्थाने अतुस् आदेशे। लिटि धातोरनभ्यासस्य इति द्वित्वे अभ्यासादि कार्ये। इ इ अतुस् इति दशायां असंयोगाल्लिट् कित् इति सूत्रेण कित्वे क्ङिति अभ्यासस्य असवर्णे इति इयङादेशे, दीर्घ इणः किति इति सूत्रेण अभ्यासस्य दीर्घे ईय् अतुस् इति जाते। सस्य रुत्वे विसर्गे ईयतुः इति सिद्धम्।

2 अगात् - इण् धातोर्लुङि लुङःस्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्धलोपे। इतश्च इति इकारलोपे। लुङ्लङ्लृङ्क्ष्वडुदात्तः इति सूत्रेण अडागमे। अ इ त् इति जाते। इणो गा लुङि इति सूत्रेण इणस्थाने गा आदेशे। च्लि लुङि इति सूत्रेण च्लि प्रत्यये। च्लेः सिच् इति सिजादेशे गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु इति सिचो लुकि अगात् इति सिद्धम्।

3 शेते - शीङ् धातोर्लटि लटः तङ्, तिप्तस्झि इति सूत्रेण त प्रत्यये। तिङ्शित्सार्वधातुकम् इति सूत्रेण सार्वधातुकसंज्ञायाम्, कर्तरि शप् इति शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुकि। शीङः सार्वधातुके गुणः इति सूत्रेण गुणे। टित आत्मनेपदानां टेरे इति एत्वे शेते इति सिद्धम्।

4 शयाते - शीङ् धातोर्लटि लटःस्थाने तिप्तस्झि इति सूत्रेण आताम् प्रत्यये। सार्वधातुकसंज्ञायाम् शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुकि, शीङः सार्वधातुके गुणः इति ईकारस्य गुणे एचोऽयवायावः इति अयादेशे टित आत्मनेपदानां टेरे इति एत्वे शयाते इति सिद्धम्।

अमरनाथ मिश्र
स्नातको० प्रा० व्याकरण
रा० उ० सं० म० वि०
सुलतानपुर